# A

**24728** **120 MINUTES**

1. नैषधीयचरितमहाकाव्ये कति सर्गाः सन्ति ?
   A) शतम् B) द्वाविंशति C) विंशति D) अष्टादश

2. देहात्मवादिनःके ?
   A) भाट्टमीमांसकाः B) प्राभाकराः
   C) वेदान्तिनः D) चार्वकाः

3. एतेषु प्रस्थानत्रये किम् न अन्तर्भूतम्भवति ?
   A) भगवद्गीता B) उपनिषदः C) ब्रह्मसूत्रम् D) निरुक्तम्

4. वस्तुनि अवस्त्वारोपः .........।
   A) उपचारः B) धर्मः C) अध्यासः D) अभावः

5. ज्ञानेन्द्रियाणि कति ?
   A) दश B) नव C) द्वादश D) पञ्च

6. ब्रह्मजिज्ञासावादिनः के ?
   A) नैयायिकाः B) वैशेषिकाः C) वेदान्तिनः D) मीमांसकाः

7. .......... च पश्यामि विपरीतानि केशव।
   A) वानानि B) गानानि C) यशांसि D) निमित्तानि

8. संभावितस्य च......... मरणाद् अतिरिच्यते।
   A) धनानि B) अकीर्तिः C) दारिद्र्यम् D) मानम्

9. समत्वं .......... उच्यते ।
   A) योगः B) विद्या C) नयः D) वृत्तिः

10. स्वधर्मे निधनं श्रेयः परधर्मो ............।
    A) सुखावहः B) भयावहः C) करणीयः D) अधार्मिकः

11. भगवद्गीतायां कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् इत्यादि केन उक्तम् ?
    A) अर्जुनेन B) कृष्णेन C) सञ्जयेन D) जनमेजयेन

12. पञ्चतन्त्रेषु तृतीयः तन्त्रभागः कः?

A) लब्धप्रणाशः B) काकोलूकीयम् C) मित्रलाभः D) मित्रभेदः

13. अमरसिंहकृते नामलिङ्गानुशासने कति काण्डानि सन्ति ?

A) दश B) अष्टादश C) विंशति D) त्रीणि

14. भागवतपुराणे सामान्यतः कति सहस्रं श्लोकाः सन्ति ?

A) चतुर्विंशति B) द्वादश C) अष्टादश D) शतम्

15. कस्मिन् ग्रन्थे रूपकाणां उपरूपकाणां च उपन्यासः विद्यते ?

A) दशरूपके B) ध्वन्यालोके

C) भामहालङ्कारे D) कव्यप्रकाशे

16. शिवानन्दलहरी इति स्तोत्रकाव्यस्य कर्ता कः?

A) शङ्करः B) नारायणभट्टः

C) कुलशेखरः D) विल्वमङ्गलम्

17. अधोनिर्दिष्टेषु वरदराजेन कृतः ग्रन्थः ।

A) अष्टाध्यायी B) वार्तिकम्

C) महाभाष्यम् D) लघुसिद्धान्तकौमुदी

18. सरसिजमनुविद्धं शैवलेनापि रम्यम् ... इत्यत्र वृत्तं किम्?

A) गीतिः B) मालिनी C) स्रग्धरा D) मन्दाक्रान्ता

19. गीतगोविन्दकाव्ये कति अष्टपदीपद्यानि सन्ति ?

A) सप्त B) अष्टौ C) दश D) चतुर्विंशति

20. पूर्वेभिः इति कुत्र प्रयोगो दृश्यते?

A) रघुवंशे B) ऋग्वेदे C) नैषधीयचरिते D) माघकाव्ये

21. मूषिकवंशाख्यस्य इतिहासमहाकाव्यस्य कर्ता कः ?

A) कल्हणः B) बिल्हणः C) जल्हणः D) अतुलः

22. ऋग्वेदे अग्निसूक्ते अग्निमीले पुरोहितम् इत्यत्र छन्दः किम्?

A) अनुष्टुप् B) त्रिष्टुप् C) गायत्री D) बृहती

23. भोजराजेन रचितः काव्यशास्त्रग्रन्थः कः?

A) काव्यानुशासनम् B) शृङ्गारप्रकाशः

C) दशरूपकम् D) एकावली

24. मालतीमाधवप्रकरणस्य कर्ता कः?

A) शूद्रकः B) भासः C) कालिदासः D) भवभूतिः

25. मुकुन्दमाला इति स्तोत्रकाव्यस्य कर्ता कः?

A) मेल्पुत्तूर नारायणभट्टः B) कुलशेखरः

C) कृष्णलीलाशुकः D) कालिदासः

26. हितोपदेशस्य कर्ता कः?

A) विष्णुशर्मा B) विष्णुगुप्तः C) नारायणः D) कौटिल्यः

27. वृत्तशास्त्रे मध्यलघुनामकः गणः कः ?

A) रगणः B) सगणः C) मगणः D) यगणः

28. ..........विशेषश्चेदुपमानोपमेययोः।

A) दीपकम् B) अनन्वयः C) व्यतिरेकः D) दृष्टान्तः

29. कन्नडभाषा कस्मिन् भाषागोत्रे अन्तर्भवति?

A) केल्टिक् B) द्राविड C) आर्य D) चैनीस्

30. वैदिकमन्त्रेषु मुख्यतया उपवर्णिता देवता का?

A) इन्द्रः B) सविता C) वरुणः D) रुद्रः

31. कस्य वेदस्य शुक्लकृष्णभेदः अस्ति।

A) सामवेदस्य B) अथर्ववेदस्य C) नाट्यवेदस्य D) यजुर्वेदस्य

32. एतेषु अर्थविकासस्य उदाहरणं किम्?

A) तैलम् B) पिता C) पङ्कजम् D) नीडः

33. एच् प्रत्याहारे अन्तर्भूताः वर्णाः के?

A) इ उ ऋ लृ B) ए ओ ऐ औ

C) ज ब ग ड द D) ह र ल प

34. रघुवंशानुसारेण सुदक्षिणा कस्य पत्नी भवति?

A) रघोः B) दिलीपस्य C) दशरथस्य D) अजस्य

35. नासदीयसूक्तम् कस्मिन् वेदे विद्यते?

A) सामवेदे B) यजुर्वेदे C) ऋग्वेदे D) अथर्ववेदे

36. अधोनिर्दिष्टेषु लीलाशुकेनरचितं स्तोत्रं किम् ?

A) श्रीकृष्णकर्णामृतम् B) नारायणीयम्

C) सौन्दर्यलहरी D) मुकुन्दमाला

37. चारुदत्तः शूद्रकस्य कस्मिन् नाटके नायकः भवति?

A) मालविकाग्निमित्रे B) ऊरुभङ्गे

C) शाकुन्तले D) मृच्छकटिके

38. अभिधावृत्तिमातृका इति ग्रन्थस्य कर्ता कः?

A) बिल्हणः B) कल्हणः C) मुकुलभट्टः D) धनिकः

39. सन्देशकाव्येषु संस्कृते प्रायेण स्वीकृतं वृत्तं किम्?

A) हरिणी B) वियोगिनी C) मन्दाक्रान्ता D) शालिनी

40. समर्थनीयस्यार्थस्य .......... समर्थनम् ।

A) व्यतिरेकः B) अनुमानम् C) काव्यलिङ्गम् D) दीपकम्

41. मृगनयना इत्यत्र कः समासः?

A) अव्ययीभावः B) तत्पुरुषः C) कर्मधारयः D) बहुव्रीहिः

42. कुमारसंभवकाव्यानुसारेण मैनाकस्य सहोदरी का?

A) मेना B) पार्वती C) इन्दुमती D) इन्द्राणी

43. कारिकावली अथवा भाषापरिच्छेदः केन रचिता ?

A) अन्नंभट्टेन B) विश्वनाथन्यायपञ्चाननेन

C) उदयनेन D) जयन्तभट्टेन

44. तार्किकमते सन्निकर्षाः कतिविधाः?

A) चत्वारः B) षट् C) अष्टौ D) पञ्च

45. स्मृतिव्यतिरिक्तं ज्ञानम् .........।

A) अनुभवः B) स्मरणम्

C) अर्थक्रियाकारित्वम् D) विज्ञानम्

46. समवायिकारणस्य नामान्तरं किम् ?

A) उपादानम् B) निमित्तम्

C) अन्यथासिद्धम् D) असमवायि

47. तार्किकमतेन अभावस्य ......... भेदाः सन्ति।

A) दश B) चत्वारः C) पञ्च D) षट्

48. वेदान्तपरिभाषा नाम वेदान्तग्रन्थः केन रचितः?

A) धर्मराजेन B) श्रीशङ्करेण C) सदानन्देन D) भास्करेण

49. अथातो ब्रह्मजिज्ञासा इति कस्मिन् ग्रन्थे उक्त?

A) मीमांसासूत्रेषु B) ब्रह्मसूत्रेषु

C) न्यायसूत्रेषु D) रससूत्रेषु

50. वेदान्तानुसारेण अस्य जगतः जन्मादिः कस्मात् भवति?

A) असतः B) ब्रह्मणः C) ईश्वरात् D) मायातः

51. माया एव सामान्यतः .... इति गीयते।

A) अधर्मः B) अध्यासः C) प्रकृतिः D) परा विद्या

52. आरम्भवादःदार्शनिकेषु केषां मतम्?

A) तार्किकानाम् B) प्राभाकराणाम्

C) वेदान्तिनाम् D) चार्वाकानाम्

53. ब्रह्मसूत्रेषु तृतीयं सूत्रं किम्?

A) अथातो ब्रह्मजिज्ञासा B) तत्तु समन्वयात्

C) शास्त्रयोनित्वात् D) जन्माद्यस्य यतः

54. महाभाष्यग्रन्थस्य कर्ता कः?

A) जैमिनिः B) पतञ्जलिः C) वररुचिः D) विणुदत्तः

55. कस्मिन्नुपनिषदि भगवद्गीतायां दृष्टाः केचन श्लोकाः दृश्यन्ते ?

A) कठोपनिषदि B) केनोपनिषदि

C) तैत्तिरीये D) ईशावास्योपनिषदि

56. यथोचितं योजयत-

a. भवभूतिः 1. ऋतुसंहारः

b. सुबन्धुः 2. रावणवधम्

c. कालिदासः 3.वासवदत्ता

d. भट्टिः 4.मालतीमाधवम्

A) a-1, b-2, c-3, d-4 B) a-4, b-3, c-1, d-2

C) a-2, b-3, c-4, d-1 D) a-3, b-2, c-4, d-1

57. यथोचितं योजयत-

a. कुमारिलभट्टः 1. सांख्यतत्वकौमुदी

b. वर्धमानमहावीरः 2.तन्त्रवार्तिकम्

c. वाचस्पतिमिश्रः 3. न्यायसिद्धान्तमुक्तावली

d. विश्वनाथः 4. सप्तभङ्गिनयः

A) a-1, b-2, c-3, d-4 B) a-4, b-3, c-1, d-2

C) a-2, b-4, c-1, d-3 D) a-3, b-2, c-4, d-1

58. यथोचितं योजयत-

a. ऊरुभङ्गः 1. भवभूतिः

b. महावीरचरितम् 2. कुलशेखरः

c. मृच्छकटिकम् 3. भासः

d. तपतीसंवरणम् 4. शूद्रकः

A) a-1, b-2, c-3, d-4 B) a-2, b-4, c-1, d-3

C) a-2, b-1, c-4, d-3 D) a-3, b-1, c-4, d-2

59. वैदिकपदार्थचिन्तने प्रसिद्धस्य निरुक्तस्य कर्ता कः?

A) पाणिनिः B) कात्यायनः C) यास्कः D) हरदत्तः

60. भगवतः परमेश्वरस्य श्वशुरः कः?

A) कुबेरः B) वैश्रवणः C) हिमवान् D) गणेशः

61. रामपाणिवादप्रणीतं महाकाव्यं किम् ?

A) रावणवधः B) नैषधीयचरितम्

C) राघवीयम् D) वासवदत्ता

62. वक्तुरिच्छा तु ..........।

A) अभिधा B) लक्षणा C) तात्पर्यम् D) व्यञ्जना

63. अर्थान्तरसंक्रमितवाच्यध्वनिः कस्मिन् ध्वनिभेदे अन्तर्भवति?

A) अभिधामूलध्वनौ B) रसध्वनौ

C) लक्षणामूलध्वनौ D) रसवदलङ्कारे

64. वक्रोक्तिकारेण कुन्तकेन सामान्यतः कति वक्रताप्रकाराःनिर्दिष्टाः?

A) पञ्च B) षट् C) सप्त D) त्रयः

65. अन्यत्र वाक्यार्थे प्रधाने, अङ्गं तु रसादयः। तत्र को नाम अलङ्कारः?

A) गुणालङ्कारः B) दोषालङ्कारः

C) रसवदलङ्कारः D) रसध्वनिः

66. मम्मटभट्टमते उपचारलक्षणा कतिविधा ?

A) त्रिधा B) चतुर्विधा C) अष्टधा D) दशधा

67. सन्दर्भेषु दशरूपकं श्रेयः इति केन आचार्येण उक्तम् ?

A) धनिकेन B) मम्मटेन C) वामनेन D) विश्वनाथेन

68. रसव्याख्याने चित्रतुरगन्यायः केन समर्थितः ?

A) भट्टलोल्लटेन B) श्रीशङ्कुकेन C) भट्टनायकेन D) धनिकेन

69. रससूत्रव्याख्याने भुक्तिवादस्य वक्ता कः ?

A) अभिनवगुप्तः B) मुकुलभट्टः

C) भट्टलोल्लटः D) भट्टनायकः

70. स्वप्नवासवदत्ते विदूषकस्य नाम किम्?

A) माडव्यः B) मैत्रेयः C) सोमरातः D) वसन्तकः।

71. आश्चर्यचूडामणिनाटके चतुर्थाङ्कस्य नाम किम्?

A) मायासीताङ्कः B) पर्णशालाङ्कः

C) जटायुवधाङ्कः D) अङ्गुलीयाङ्कः।

72. तपतीसंवरणनाटकस्य कर्ता कः?

A) कुलशेखरः B) शक्तिभद्रः C) भवभूतिः D) श्रीकण्ठः

73. अभिज्ञानशाकुन्तलनाटके दुष्यन्तस्य पुरोहितः कः?

A) माडव्यः B) वसन्तकः C) मैत्रेयः D) सोमरातः

74. अधोनिर्दिष्टेषु कण्वशिष्यः कः?

A) कौत्सः B) शार्ङ्गरवः C) मारीचः D) अजामिलः

75. त्रिषु कालिदासनाटकेषु नान्दीश्लोके प्रस्तुतः कः?

A) शिवः B) विष्णुः C) रामः D) बलरामः

76. उदयनस्य वीणायाः नाम किम्?

A) वल्लकी B) कच्छपी C) घोषवती D) विपञ्ची

77. कर्तारः सुलभाः लोके विज्ञातारस्तु दुर्लभाइति कस्मिन् ग्रन्थे निर्दिष्टम्?

A) मालतीमाधवे B) शाकुन्तले

C) स्वप्नवासवदत्ते D) मुद्राराक्षसे

78. सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तकरणप्रवृत्तयः। कस्येदं वचनम्?

A) लक्ष्मणस्य B) दुष्यन्तस्य

C) यौगन्धरायणस्य D) चारुदत्तस्य

79. गोशब्दस्य द्वितीयावहुवचने रूपम् ।

A) गावः B) गावान् C) गान् D) गाः

80. अस्मच्छब्दस्य चतुर्थी एकवचनम् ।

A) अस्माकम् B) मयि C) मम D) मह्यम्

81. युष्मच्छब्दस्य सप्तमी एकवचनम् किम्?

A) त्वयि B) युवाम् C) तव D) युष्माकम्

82. कृञ् धातोः लट्परस्मैपदि प्रथमाबहुवचनम् किम्?

A) कुर्वन्तु B) कुर्वन्ते C) कुर्वते D) कुरुते।

83. महाभाष्यस्य प्रथमाध्यायो भवति...........।

A) पस्पशाह्निकम् B) वार्तिकम्

C) काशिकावृत्तिः D) कारिकावली

84. वेदान्तसारस्य कर्ता कः?

A) धर्मराजाध्वरीन्द्रः B) श्रीशङ्करः

C) सदानन्दः D) भास्करः

85. अथातो ब्रह्मजिज्ञासा इति सूत्रे अतः इति कस्मिन् अर्थे प्रयुक्त?

A) मङ्गलार्थे B) समाप्तौ C) हेत्वर्थे D) जिज्ञासायाम्

86. वेदान्तसूत्रे कति अध्यायाः सन्तिः?

A) पञ्च B) दश C) चत्वारः D) षोडश

87. प्रतीतपदार्थको लोके ..... शब्दः इत्युच्यते।

A) अर्थः B) ध्वनिः C) प्रकृतिः D) स्फोटः

88. परिणामवादस्य वक्तारः के?

A) तार्किकाः B) प्राभाकराः C) वेदान्तिनः D) सांख्याः

89. मीमांसासूत्रकारः कः?

A) जैमिनिः B) शङ्करः C) पाणिनिः D) वामनः

90. ब्रह्मसूत्रस्य विशिष्टाद्वैतपरः व्याख्याकारः कः?

A) भास्करः B) बादरायणः C) शङ्करः D) रामानुजः

91. पुरुषो हि विनाशहेत्वभावात् ........... इत्युच्यते।

A) अप्रमेयः B) अकलङ्कः C) चिन्मयः D) अविनाशी

92. विधिनिषेधमोक्षपराणि ..................।

A) पुराणानि B) इतिहासादीनि C) शास्त्राणि D) दर्शनानि

93. ............ च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वम् ।

A) विशेषः B) प्राकट्यम् C) सादृश्यम् D) समवायः

94. अपाये (विश्लेषे) सति ध्रुवं कारकं किम्?

A) करणम् B) सम्प्रदानम् C) अपादानम् D) कर्म

95. आधारार्थेषु कटे आस्ते इत्यत्र कीदृशः आधारः भवति?

A) वैषयिकः B) अभिव्यापकः C) औपश्लेषिकः D) नवीनः

96. तार्किकमते कति कर्माणि सन्ति ?

A) दश B) चतुर्विंशति C) द्वादश D) पञ्च

97. कार्यनियतपूर्ववर्ति .................।

A) कारणम् B) परामर्शः C) अनुमानम् D) कार्यम्

98. नित्यत्वे सत्यनेकसमवेतत्वम् ...........।

A) अनुमानम् B) प्रत्यक्षम् C) शाब्दम् D) सामान्यम्

99. गुणः तार्किकमते कतिविधः ?

A) दशविधः B) नवविधः

C) चतुर्विंशतिविधः D) पञ्चविधः

100. अन्यथासिद्धाः कतिविधाः?

A) पञ्च B) नव C) सप्त D) एकः

101. बृहज्जातकस्य नामान्तरं किम्?

A) होराशास्त्रम् B) प्रश्नमार्गः

C) जातकचन्द्रिका D) सूर्यसिद्धान्तः

102. कलत्रशयनकारकः ग्रहः कः?

A) बुधः B) शुक्रः C) चन्द्रः D) मन्दः

103. वराहमिहिराचार्यस्य बृहज्जातके कति अध्यायाः सन्तिः?

A) दश B) विंशति C) षड्विंशति D) त्रिंशत्

104. तुलाराशिः कस्य नीचराशिः भवति?

A) कुजस्य B) शुक्रस्य C) शनेः D) सूर्यस्य

105. ज्योतिषे कविः इति पदेन कः ज्ञायते?

A) रविः B) कुजः C) शुक्रः D) बुधः

106. कुजस्य स्वक्षेत्रे के?

A) मेषकीटौ B) वीणा कन्या च

C) वृषतुले D) चापमीनौ

107. एतासु रिक्तासु तिथीषु का न अन्तर्भूता?

A) नवमी B) तृतीया C) चतुर्थी D) चतुर्दशी

108. गृहारम्भप्रवेशयोः निषिद्धौ वारौ कौ ?

A) बुधसितयोः B) अर्कारयोः C) बुधशुक्रयोः D) गुरुसितयोः

109. वरस्य जन्मर्क्षं कस्मिन् कर्मणि विशेषतो निषिद्धम्?

A) विवाहे B) भोजने C) राजदर्शने D) सीमन्ते।

110. ग्रहेषु कः कस्यापि अन्यस्य ग्रहस्य शत्रुर्न भवति?

A) बुधः B) चन्द्रः C) गुरुः D) कुजः

111. सिंहराशेः अधिपः कः?

A) मन्दः B) शुक्रः C) रविः D) कुजः

112. लीलावत्याः कर्ता कः ?

A) वराहमिहिरः B) आर्यभटः

C) कल्याणवर्मा D) भास्करःद्वितीयः

113. बृहत्संहितायाः कर्ता कः?

A) भास्करःद्वितीयः B) लल्लः

C) आर्यभटः D) वराहमिहिरः

114. आर्यभटीये कति पादाः सन्तिः?

A) त्रयः B) चत्वारः C) पञ्च D) षट्

115. आर्यभटीये कस्मिन् पादे गीती वृत्तं स्वीकृतम्?

A) कालपादे B) गोलपादे C) गीतिकापादे D) कालक्रियापादे

116. अष्टाध्याय्यां ....... पादाः सन्ति।

A) पञ्चादश B) अष्टौ C) द्वात्रिंशत् D) अष्टादश

117. गुरूपदेशः इत्यत्र केन सूत्रेण सन्धिकार्यः?

A) एचोयवायावः B) उरण् रपरः

C) इको यणचि D) अकः सवर्णे दीर्घः

118. विषेण इत्यत्र केन सूत्रेण नकारस्य णत्वम्?

A) रेफः परस्य B) रषाभ्यां नो णः समानपदे

C) ढ्रलोपे पूवस्य दीर्घोणः D) मनस्ते

119. यथाशक्ति- इत्यत्र कः समासः?

A) बहुव्रीहिः B) अव्ययीभावः

C) षष्ठीतत्पुरुषः D) द्विगु:

120. विजयते इत्यत्र कस्मात् सूत्रात् आत्मनेपदम्?

A) विपराभ्यां जेः B) व्याङ्परिभ्यो रमः

C) अकर्मकाच्च D) कर्तरि कर्मव्यतिहारे